International Journal of Sanskrit Research 2020; 6(2): 153-156

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(2): 153-156
© 2020 IJSR
www.anantaajournal.com
Received: 11-01-2020
Accepted: 14-02-2020

**सुदाम परामानिक:**
शोधछात्रः, साहित्यविभागः
राष्ट्रियसंस्कृतविद्यापिठम्, तिरुपतिः,
आंध्र प्रदेश, भारत।

Corresponding Author:
**सुदाम परामानिक**
शोधछात्रः, साहित्यविभागः
राष्ट्रियसंस्कृतविद्यापिठम्, तिरुपतिः,
आंध्र प्रदेश, भारत।

# भाति ते भारतम् इति प्रतिकाव्यस्य वैशिष्ट्यम्

## सुदाम परामानिक:

आधुनिकभारतीयसंस्कृतसाहित्ये नवसाहित्यम्, सर्जनात्मकसाहित्यम्, अनुवादसाहित्यम्, समकालिकसाहित्यम्, लौकिकसाहित्यम्, जनसाहित्य च इत्यदि विविधानि साहित्यतत्त्वानि प्रसिद्धानि प्रचलितानि च सन्ति।
भारतदेशे एकस्मिन् समये ऐतिहासिक-भौगलिक-धार्मिक-प्राकृतिक-वैज्ञानिकादिषु सर्वेषु क्षेत्रेषु दक्षतायाः आदर्शत्वं प्रस्तुतमासीत्। परन्तु कालेन जनगणेषु कलुषिता ऋणात्मिका चिन्ता तदादर्शस्य विनाशे कारणीभूता अभवत्। भारतवर्षो अयं धर्मनिरपेक्षदेशत्वेन ख्यातः। तथापि अत्र राजनीतिकारणात् धर्मभेदेन देशोऽयं विभाजितः। तेन बालकेषु महिलासु वृद्धेषु च शूचितानामिका वस्तोरभावः दृष्टः। तेन कारणेन हृदये शैक्षिकसमाजिकप्राकृतिकनैतिकातासु प्रदूषिता आगता। तत्र च मनुष्य एव कारणम्। सम्प्रति सम्पूर्णभारतवर्षस्य वास्तविकचित्रणस्य शिक्षासंस्कारधार्मिकश्चेति वैशिष्ट्यम् "भाति ते भारतम्" इति प्रतिकाव्ये आलोचितम्। तद् यथा-

### शिक्षाव्यवस्था

शिक्षा व्यक्तेः चरित्रनिर्माणे प्रामुख्यं भजते। सर्वोपरि व्यापकत्वेन सा राष्ट्रनिर्माणे समाजनिर्माणे वा उपयोगी भवति। चरित्रस्य समाजे मूलत्वात् तद्गते व्यक्तेरस्तित्वमेव अपगच्छति। तेन व्यपकतया तस्याभावे समाजोऽपि मृतप्रायो भवति। शिक्षाविषये यथोक्तिः-

**येषां न विद्या न तपो न दानं ज्ञानं न शीलं न गुणो न धर्मः।**
**ते मर्त्यलोके भुवि भारभूताः मनुष्यरुपेण मृगाश्चरन्ति।।**

अर्थात् –'**विद्या विहीनः पशुः**' इति भतृहरिना उक्तम्

भारतीयशिक्षाव्यावस्था समग्रविश्वे प्रसिद्धं अस्ति। प्राचीनकाले शिक्षाव्यावस्थायां एकः प्रमुख्यः प्रक्रियायाः प्रचलनं आसीत् **सा गुरुशिष्यस्यपरम्परा इति**। शिष्यः स्वस्य परिचयं गुरुनाम्ना ददाति। यथा- महाभारतमहाकाव्ये श्रुयते 'द्रोणशिष्यः अर्जुनः' इति स्वयं अर्जुनः उच्यते। भारतीयसंस्कृतौ गुरुणाम् अध्यापकानां स्थानं सर्वोपरि आसीत्।यथा-

**गुरुर्ब्रह्मा गुरुर्विष्णुः, गुरुर्देवो महेश्वरः।**
**गुरुःसाक्षात्परं ब्रह्म तस्मै श्रीगुरवे नमः।।**

अद्यतने समाजे शिक्षाव्यवस्थायाः अवनतेः बहुविधानि कारणानि विद्यन्ते। तत्रादौ भवति गुरुशिष्यपरम्परायां व्याघातः जातः। यतो हि आधुनिकाः अध्यापकाः प्राध्यापकाश्च ट्युशनवृत्तौ संलग्नाः सन्ति, वेतनमेव तेषां प्रमुखमुद्देश्यं न तु शिष्यस्य ज्ञानसम्पादम्। अतः पठनपाठनं स्वयमेव अस्ताचलं गतम्। तेषां मते आदर्शचरित्रं तु तिलाञ्जलिरुपेण तैः दत्तम्-विस्मृतं सर्वं तैः- -

**शिक्षकाध्यापकाः ट्युशने तत्परास्त्यक्तविद्याधना नैव पाठे रताः।**
**शिष्यकैर्निन्दिताः वेतने तत्पराः, सद् गुरोर्योग्यता नास्ति तद् भारतम्॥**

द्वितीयं भवति पाश्चात्यरूपात्मिकायाः प्रक्रियायाः प्रवेशः। यदैव वयं शनैः शनैः स्वतन्त्रताप्राप्त्यर्थम् अग्रसराः अभवम्। ततः एव पाश्यात्यकरणस्य आरम्भो जातः। स्वतन्त्रप्राप्त्यनन्तरं समाजविकाशरूपं शकटं यदा प्रवृत्तं तदा पन्थानः विभिन्नतायाः कारणात् शिक्षाव्यवस्थापि कलुषिता जाता। अर्थात् मनुष्येषु व्रिटिशजनानां गमनेऽपि तद्वती चिन्ता ना परिवर्तिता।
वर्तमाने समाजे राजनीतिः एका मुख्या व्यवस्था। तच्च सर्वत्र प्रमुखेन अग्राधिकारं भजते। स शुद्धा वाग्रूपी सरस्वतीमपि न त्यक्तवान् अर्थात् आदर्शचरित्रनिमार्णकारी शिक्षकोऽपि राजनितौ प्रविष्टवान्। तेन समाजे प्रियऽभवत्। आचार्यो नाम **आचारं ग्राहयति आचिनोति अर्थात् बुद्धिम् वा** इति यास्कः। यथा चोक्तम्

**मातृदेवो भव पितृदेवो भव आचार्यदेवो भव॥**

आचार्यो विष्णुभक्तोऽस्ति। स वेदत्ता चास्ति। तदेवाह-

**आचार्यो वेदसम्पन्नो विष्णुभक्तो विमत्सरः।**
**मन्त्रज्ञो मन्त्रभक्तश्च सदा मन्त्रात्मकः शुचिः।।**

आचार्यो पितृमान् मातृमान् भवति। यतो हि सः संस्कारान् ददाति। तदेवाह-

**आचार्य उन्नयमानो ब्रह्मचारिणं कृणुते गर्भमन्तः।**
**तं रात्रिस्तिस्र उदरे बिभर्ति तं जातं द्रष्टुमभिसंयन्ति देवाः।।**

परन्तु अधुना ते राजनितीकरणे व्यस्ताः सन्ति। तेन कारणेन समाजे शिक्षाव्यवस्थायाः एषा दशा आगता।

**संस्कारस्थितिः-**

भारतवर्षस्य संस्कृतिसंस्कारः दृष्टान्तरुपेण समग्रविश्वे प्रचलिता अस्ति। भारतदेशस्य समग्र कायचिन्तनं वेदोपनिषदधर्मशास्त्रयोगशास्त्रे निहितं वर्तते। यत्र सर्वदा **रामा हरे-कृष्णा हरे** इति भजनकीर्तनं गीयते। परन्तु समयेऽस्मिन् आङ्ग्लोसंस्कारैः सर्वं नष्टं जायते। इतोऽपि आङ्ग्लभाषावेषभुषादिषु रुचिः वर्धमानः वर्तते। तदुक्तम्-यथा-

**आङ्ग्लभाषायाप्रभुत्वं प्रशस्तं पर-माङ्ग्लवेषादिषु प्रार्थनीया रुचिः।**
**आङ्ग्लसंस्कारनष्टा तथा संस्कृतिः ध्वंसगेहे निजे ते स्थितं भारतम्।।**

अपरञ्च सम्प्रति नार्यः कीदृशयः। नुर्नरस्य वा धर्म्माचारोऽस्याम् इति नृ इति धातोः अञ्प्रत्यये ङीनि च कृते नारी इति शब्दो निष्पन्नः। तस्याश्च चतस्रः जातयः । यथा

**पद्मिनी चित्रिणी चैव शङ्खिनी हस्तिनी तथा।**
**चतस्रो जातयो नार्य्या रतौ ज्ञेया विशेषतः।।** इति रसमञ्जरी ४.१७

किञ्च प्रसिद्धमस्ति-

**यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।**
**यत्रैतास्तु न पूज्यन्ते सर्व्वास्तत्राफलाः क्रिया।**

तस्मादेताः सर्वदा पूज्याः भवन्ति। ताः यस्मिन्नेव कूले तिष्ठन्ति नित्यं तत्र ध्रुवं कल्याणं भवति। यत्र नार्याः सीताऽम्विकाश्च वाणी वन्दते, परन्तु समाजे तादृशी स्थितिर्नास्ति महिलानाम्। तदेवाह-

**नैव सीता सदा माधुरी स्मर्यते, अम्बिका नैव रानी पुनः स्तूयते।**
**प्रीति जिण्टा विपाशा मयी सभ्यता, यौवनोच्छृङ्खलं तावकं भारतम्।।**
**यत्र नारीजनोऽसौ विवादेरतः वेल्लर्नी वापि चित्वा च सम्मार्जनीम्।**
**हस्तपादप्रहारैः नमन्ति पतिं प्रीतियुद्धातुरं तावकं भारतम्।।**
**धूमवर्त्या तथा मद्यपानेन वै स्वैरिणि दर्शयन्ती प्रभुत्वं गृहे**
**क्रोधपूर्णा चपेटां ददात्येव सा स्वामिने सभ्यता पश्चिमा भारते।।**

**धार्मिकस्थितिः**

धरति लोकान् ध्रियते पुण्यात्मभिरिति इति धृ धातोः मन्प्रत्यये निष्पनोऽयं धर्मः इति शब्दः। तस्य तु मैत्र्यां प्रसादः, दयायामभयम्, शान्त्यां सुखम्, तुष्ट्यां मुतः पुष्ट्यां गर्व्वः, मेधायां स्मृतिःइत्यादयः पर्यायाः।तद्वत् धर्मस्थानमपि मनुष्यानां कृते परमपवित्रमासीत्। तत्र गत्वा जनाः संसारे जायमानाः क्लिष्टाः परित्यजन्तः शान्तिं प्राप्नुवन्ति। परन्तु तदपि कलुषितम्। तद्विषये आह-

**यच्च तीर्थेषु कोलाहलैराकुलं लुब्ध-पण्डा-जनैर्वञ्चकैः साधुभिः।**
**धर्मपाखण्डदिग्धैर्जनैश्चादितं धार्मिकैर्वञ्चितं लुण्टितं भारतम्।।**

पूर्वं सर्वे मनुष्याः मानवधर्ममेव प्राधान्यं ददाति स्म। मन्दिरमस्जिदादयस्तु परोक्षत्वेन व्यवहरन्ति स्म। अधुना स्वसम्प्रदायस्य प्रचाराय प्रसाराय च समाजो गोष्ठीरूपः दण्डः सृष्टः। तद्विषये आह कविः-

**जन्मभूमेर्विवादे स्थितो राघवो नैव कारागृहान्मुच्यते माधवः।**
**गोवधाद्दुःखितं यत्र वृन्दावनं शङ्करोऽस्ति श्मशाने सुखी भारते।।**

शिक्षासंस्कारः धार्मिकादिषु एते त्रयमस्मिन् ग्रन्थस्य मौलिकवैशिष्ट्यरुपेण प्रतिपादयति। अस्माकं समाजस्य मूलं एतेएव। अस्माकं समाजे एतेषु परस्परं सम्बन्धञ्च गुरुत्वपूर्णं वर्त्तते। परन्तु अस्मिनसमये जनानां कारणेन एते एव कुलषिता। सर्वमपि राजनीतिकारनात् जाताः। काव्येऽस्मिन् कविः भारतबर्षस्य उपहासं न करोति अपि तुऽस्मान् उद्वोधयति यत् वयम् सर्वे मिलित्वा अस्य परिमार्जनाय प्रयासं क्रुर्मः इति। काव्येऽस्मिन् भारतस्य भव्यमुदारं रमणीयम् आदर्शपूतं चित्रमस्ति। वस्तुतः अतिशयोक्तिस्तु काव्यस्य प्राणस्वरुपा। सैवा सर्वत्र वक्रोक्तिमयी शैली समाजस्य विरुपताया दर्शनं कर्तुं क्षमास्ति। अतः यथार्थं वास्तवरञ्जितं निरुपणमस्ति। सेव व्यङ्ग्यकाव्योपकारिणी। किन्तु व्यक्तिविशेषं, जातिविशेषं, धर्मविशेषं प्रति नास्ति द्वेषः नास्ति, कस्यापि विडम्बनायास्तिरस्कारस्य वा भावो रचनाकारस्येति वाचका भावकाः सुधीयश्च स्वीकुर्वन्तु।

इत्थमत्र मौलिकरूपेण शिक्षासंस्कारधर्मादयः विचारिताः।

**सन्दर्भग्रन्थसूची –**


1. डा.हर्षदेवमाधवस्य विरचितं – भाति ते भारतम्, Published with the Financial Assistance from the Rashtriya Sanskrit Sansthen, New Delhi – 58
2. महाकविभानुदत्तमिश्रविरचिता – रसमुञ्जरी, श्रीकृष्णनिबन्धभवनम्, वनारस – १,२००६

3. पद्मपुराणम् – गीताप्रेस, गोरखपुर
4. उपनिषद् – गीताप्रेस, गोरखपुर

## सहायकग्रन्थसूची -

| | | |
|---|---|---|
| १.सुभाषितम् | २.भा.ते.भा.- ३४, | ३.तै.उ – ११.५.३ |
| ४.प.पु -६.६.२२३, | ५.र.म – ४.७७, | ६.भा.ते.भा. -३५ |
| ७.भा.ते.भा.- २२, | ८.भा.ते.भा. -१०, | ९.भा.ते.भा.- ७९ |
| १०.भा.ते.भा.- ६, | ११.भा.ते.भा.- ८ | |